"चिरंपथिकदूराघिममिलदलकलताग्रे-
बलावलिग्रथिता।
करतोयेव मृगाक्ष्या दृष्टिरिदानीं सदानीरा ॥")

सदापुष्प:, पुं, (सदा पुष्पं यस्य ।) नारिकेलवृक्ष:। इति शब्दमाला ॥ सर्व्वदाकुसुमयुक्ते, त्रि ॥ (यथा, महाभारते। १४। ३५। २०-२२।
"अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान्।
महाहङ्कारविटप इन्द्रियाङ्कुरकोटर: ॥
महाभूतविशेषश्च विशेषप्रतिशाखवान्।
सदापर्ण: सदापुष्प: सदाशुभफलोदय: ॥
आजीव: सर्व्वभूतानां ब्रह्मबीज: सनातन:।
एतज्ज्ञात्वा च तत्त्वानि ज्ञानेन परमासिना॥
छित्त्वा चामरतां प्राप्य जहाति मृत्युजन्मनी॥")

सदापुष्पी, स्त्री, (सदा पुष्पं यस्या:। ङीष्।) रक्तार्कवृक्ष:। इति रत्नमाला ॥

सदाप्रसून:, पुं, (सदा प्रसूनं यस्य ।) रोहितक:। अर्क:। कुन्द:। इति राजनिर्घण्ट: ॥

सदाफल:, पुं, (सदा फलमस्य ।) स्कन्धफल:। नारिकेल:। उडुम्बर:। इति मेदिनी॥ विल्व:। इति जटाधर: ॥

सदाफला, स्त्री, (सदा फलं यस्या:।) त्रिसन्धि-पुष्पम्। इति राजनिर्घण्ट: ॥ वार्त्ताकुविशेष:। सला वेगुन इति कुली वेगुन इति टंकी वेगुन इति च भाषा। अस्या गुणा:।
"सदाफला त्रिदोषघ्नी रक्तपित्तप्रसादनी।
कण्डुकच्छूहरो चैव वार्त्ताकीगुणवत्तरा ॥"
इति राजवल्लभ: ॥

सदाभद्रा, स्त्री, (सदा भद्रमस्या:।) गम्भारी-वृक्ष:। इति रत्नमाला ॥

सदायोगी, [न्] पुं, (सदा सर्व्वस्मिन् काले योगी।) विष्णु:। इति त्रिकाण्डशेष:॥ हरिशयने मधु-मांसवर्ज्जनफलभागी। यथा,—
"सदामुनि: सदायोगी मधुमांसस्य वर्जनात्।
निराधीर्नीरुगोजस्वी विष्णुभक्तश्च जायते ॥"
इति तिथ्यादितत्त्वम् ॥

सदृक्, [श्] त्रि, (समान इव दृश्यतेऽसौ। समान + दृश् + "समानान्ययोश्चेति वक्तव्यम्।" ३।२।६०। इत्यस्य वार्त्तिकोक्त्या क्विन्। "दृक्-दृशवतुषु" ६। ३। ८९। इति समानस्य स:।) तुल्यम्। इत्यमर: ॥ (यथा, कथा-सरित्सागरे। ३९। ८८।
"न त्वया सदृगन्योऽस्ति त्रैलोक्येऽपि धनुर्धर")

सदृक्ष:, त्रि, (समान इव दृश्यते इति। समान + दृश + क्स:। समानस्य सादेश:।) सदृश:। इत्यमर: ॥ (यथा, भागवते। ३। १। २९।
"कच्चिद्धरे: सौम्य सुत: सदृक्ष
आस्तेऽग्रणी रथिनां साधु साम्ब: ॥")

सदृश:, त्रि, (समान इव दृश्यतेऽसौ। समान + दृश + कञ्। "दृक्दृशवतुषु।" ६। ३। ८९। इति समानस्य स:।) सम:। इत्यमर: ॥ (यथा, रघु:। १। १५।
"आकारसदृशप्रज्ञ: प्रज्ञया सदृशागम:।
आगमै: सदृशारम्भ आरम्भसदृशोदय: ॥")
उचित:। इति मेदिनी ॥

सदृशस्पन्दनं, क्ली, निष्पन्द:। इति त्रिकाण्डशेष:॥

सदेश:, त्रिं, (देशेन सह वर्त्तमान:।) निकट:। इत्यमर: ॥ देशान्वित:। यथा,—
"सदेशसवेशौ निकटे देशवेशान्वितौ क्रमात्।"
इति धरणि: ॥

सद्भूत:, त्रि, (सन् भूत:।) सत्यम्। इति हेमचन्द्र: ॥ (यथा, हरिवंशे। १४८। ४४।
"तद्भवद्भिर्गुणा वाच्या: प्रद्युम्नस्य महात्मन:।
सद्भूता: कुलरूपस्य शीलस्य वयसस्तथा ॥")

सद्म, [न्] क्ली, (सीदन्त्यत्रेति सद + मनिन्।) गृहम्। इत्यमर: ॥ (यथा, रघु:। ३। १९।
"न केवलं सद्मनि मागधीपते:
पथि व्यजृम्भन्त दिवौकसामपि ॥"*।
"विशीर्य्यते शिलादिषु पातात् विशीर्य्यन्तेऽनेन क्षुधादय इति वा। गच्छति वागच्छति निम्नं गम्यते वा प्राणिभि:। अवसादयति पिपासा-युक्तं वा। सद्लृ विशरणगत्यवसादनेषु + मनिन्।" इति निघण्टुटीका। १। १२।६६।) जलम्। इति मेदिनी ॥ (साद्यन्ते अवसाद्यन्ते प्राणिनो यत्रेति। संग्राम:। इति निघण्टु:। २। १७ ॥)

सद्य:, [स्] व्य, (समानेऽहनि इति। "सद्य: परुत्परार्य्यैषम इति।" ५। ३। २२। इति द्यप्रत्यय: समानस्य सभावश्च निपात्यते।) तत्क्षणम्। तत्पर्य्याय:। सपदि २। इत्यमर: ॥ हे तत्क्षणे तत्काले। समानेऽह्नि सद्य: कुत: क्व कुह इत्यादिना निपात:। सद्य: पतति मांसेन इति सपदि मुकुलिताक्षीम्। इयं दन्त्यादि। इति भरत: ॥

सद्य:क्षतं, क्ली, (सद्यस्तत्क्षणात् क्षतम्।) नाम। इति त्रिकाण्डशेष: ॥ तत्क्षणक्षते, त्रि ॥

सद्य:प्राणकर:, त्रि, (सद्यस्तत्क्षणात् प्राणस्य बलस्य कर:।) तत्क्षणात् बलकारकद्रव्यादि:। यथा, चाणक्ये।
"सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्।
घृतमुष्णोदकञ्चैव सद्य:प्राणकराणि षट् ॥"

सद्य:प्राणहर:, त्रि, (सद्य: प्राणस्य बलस्य हर:।) तत्क्षणात् बलायुषोर्नाशकद्रव्यादि। यथा,—
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि।
प्रभाते मैथुनं निद्रा सद्य:प्राणहराणि षट् ॥"
इति चाणक्यम् ॥

सद्य:शुद्धि:, स्त्री, (सद्यस्तत्क्षणात् शुद्धि:।) सद्य:-शौचम्। यथा,—
"देशान्तरमृते बाले सद्य:शुद्धिर्यतौ मृते ॥"
इति गारुडे १०७ अध्याय: ॥

सद्य:शौचा, स्त्री, (सद्य:शौचो यस्या:। कपि-कच्छू:। इति शब्दचन्द्रिका ॥

सद्य:शौचं, क्ली, (सद्य एव शौचं शुद्धि:।) तत्-क्षणाच्छुद्धि:। यथा,—
"शिल्पिन: कारवो वैद्या दासीदासाश्च भृत्यका:।
अग्निमान् श्रोत्रियो राजा सद्य:शौचा: प्रकी-
र्त्तिता: ॥"
इति गारुडे १०७ अध्याय: ॥*॥

अन्यच्च।
"कारव: शिल्पिनो वैद्या दासीदासास्तथैव च।
दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ ॥
सत्रिणो व्रतिनस्तावत् सद्य:शौचा उदाहृता:।
राजा चैवाभिषिक्तश्च प्रात: सत्रिण एव च ॥
यज्ञे विवाहकाले च देवयागे तथैव च।
सद्य:शौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे ॥
डिम्बाहवहतानाञ्च विद्युता पार्थिवैर्द्विजै:।
सद्य:शौचं समाख्यातं सजातिमरणे तथा ॥
अग्नौ मरुप्रपतने वीराध्वन्याप्यनाशके।
ब्राह्मणार्थे च संन्यस्ते सद्य:शौचं विधीयते ॥"
इति कौर्म्मे उपविभागे २२ अध्याय: ॥*॥

अपरञ्च। अथ सद्य:शौचम्। तत्र विष्णु:। नाशौचं राज्ञां राजकर्म्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां स्वकर्म्मणि न राजाज्ञाकारिणां तदिच्छया न देवप्रतिष्ठा-विवाहयो: पूर्व्वसंहृतयो: इति। सत्रिणां नित्यप्रवृत्तान्नदानानां सत्रे अन्नदाने। कारव: सूपकाराद्या:। आदिपुराणे।
"सूपकारेण यत् कर्म्म करणीयं नरेष्विह।
तदन्यो नैव शक्नोति तस्माच्छुद्ध: स सूपकृत् ॥"
कूर्म्मपुराणे।
"कारव: शिल्पिनो वैद्या दासा दास्यस्तथैव च।
दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ।
सत्रिणो व्रतिनस्तावत् सद्य:शौचा उदाहृता: ॥"
आदिपुराणे।
'शिल्पिनश्चित्रकाराद्या: कर्म्म यत् साधयन्त्युत।
तत् कर्म्म नान्यो जानाति तस्मात् शुद्ध:
स्वकर्म्मणि ॥
दासा दास्यश्च यत् कर्म्म कुर्व्वन्त्यपि च लीलया।
तदन्यो न क्षम: कर्त्तुं तेन ते शुचय: स्मृता: ॥"
चित्रकाराद्यरूपा: शिल्पिन:। आद्यशब्दाच्चैल-निर्णेजकाद्या:। शातातप:।
"मूल्यकर्म्मकरा: शूद्रा दासा दास्यस्तथैव च।
स्नाने शरीरसंस्कारे गृहकर्म्मण्यदूषिता: ॥"
स्मृति:।
"सद्य:स्पृश्यो गर्भदासो भक्तदासस्त्र्यहा-
च्छुचि: ॥"
वैद्या अपि चिकित्सायामेव। तथा च स्मृति:।
"चिकित्सको यत् कुरुते तदन्येन न शक्यते।
तस्मात् चिकित्सक: स्पर्शे शुद्धो भवति नित्यश: ॥"
दातार आवश्यकप्रत्यहं गोभूमिहिरण्यादि-दाने प्रवृत्ता:। तेषां तद्दान एव। प्रत्यहं दानञ्च। दातव्यं प्रत्यहं पात्रे इति याज्ञ-वल्क्यात्। कादाचित्कदानकारिणान्तु दाने प्रक्रान्ते अशौचं नास्ति तावत् यावत्तत् कर्म्म कुर्व्वन्ति इति। हारलताप्येवम्। पूर्व्वसङ्कल्पित-द्रव्यदानेऽपि नाशौचम्। यथा च मिता-क्षरायाम्।